# Saptamukhi Hanumat Kavacham

# સપ્તમુખીહનુમત્કવચમ્

## Document Information

Text title : Saptamukhi Hanumat Kavacham

File name : saptamukhiihanumatkavach.itx

Category : kavacha, hanumaana, bIjAdyAkSharamantrAtmaka

Location : doc_hanumaana

Author : Traditional

Transliterated by : Ravin Bhalekar ravibhalekar at hotmail.com

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com

Description-comments : atharvaNarahasye

Latest update : May 28, 2021

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 31, 2024

*sanskritdocuments.org*

# સપ્તમુખીહનુમત્કવચમ્

શ્રીગણેશાય નમઃ ।
ૐ અસ્ય શ્રીસપ્તમુખીવીરહનુમત્કવચસ્તોત્રમન્ત્રસ્ય, નારદઋષિઃ,
અનુષ્ટુપ્છન્દઃ,શ્રીસપ્તમુખીકપિઃ પરમાત્માદેવતા, હ્રાં બીજમ્,
હ્રીં શક્તિઃ, હ્રૂં કીલકમ્,મમ સર્વાભીષ્ટસિદ્ધ્યર્થે જપે વિનિયોગઃ ॥

કરન્યાસઃ -
ૐ હ્રાં અઙ્ગુષ્ઠાભ્યાં નમઃ ।
ૐ હ્રીં તર્જનીભ્યાં નમઃ ।
ૐ હ્રૂં મધ્યમાભ્યાં નમઃ ।
ૐ હ્રૈં અનામિકાભ્યાં નમઃ ।
ૐ હ્રૌં કનિષ્ઠિકાભ્યાં નમઃ ।
ૐ હ્રઃ કરતલકરપૃષ્ઠાભ્યાં નમઃ ॥

અઙ્ગન્યાસઃ -
ૐ હ્રાં હૃદયાય નમઃ ।
ૐ હ્રીં શિરસે સ્વાહા ।
ૐ હ્રૂં શિખાયૈ વષટ્ ।
ૐ હ્રૈં કવચાય હું ।
ૐ હ્રૌં નેત્રત્રયાય વૌષટ્ ।
ૐ હ્રઃ અસ્ત્રાય ફટ્ ॥

અથ ધ્યાનમ્ ।
વન્દેવાનરસિંહસર્પરિપુવારાહાશ્વગોમાનુષૈર્યુક્તં
  સપ્તમુખૈઃ કરૈર્દ્રુમગિરિં ચક્રં ગદાં ખેટકમ્ ।
ખટ્વાઙ્ગં હલમઙ્કુશં ફણિસુધાકુમ્ભૌ શરાબ્જાભયાન્
  શૂલં સપ્તશિખં દધાનમમરૈઃ સેવ્યં કપિં કામદમ્ ॥

બ્રહ્મોવાચ ।

સપ્તશીર્ષ્ણઃ પ્રવક્ષ્યામિ કવચં સર્વસિદ્ધિદમ્ ।
જપ્ત્વા હનુમતો નિત્યં સર્વપાપૈઃ પ્રમુચ્યતે ॥ ૧॥

સપ્તસ્વર્ગપતિઃ પાયાચ્છિખાં મે મારુતાત્મજઃ ।
સપ્તમૂર્ધા શિરોઽવ્યાન્મે સપ્તાર્ચિર્ભાલદેશકમ્ ॥ ૨॥

ત્રિઃસપ્તનેત્રો નેત્રેઽવ્યાત્સપ્તસ્વરગતિઃ શ્રુતી ।
નાસાં સપ્તપદાર્થોઽવ્યાન્મુખં સપ્તમુખોઽવતુ ॥ ૩॥

સપ્તજિહ્વસ્તુ રસનાં રદાન્સપ્તહયોઽવતુ ।
સપ્તચ્છન્દો હરિઃ પાતુ કણ્ઠં બાહૂ ગિરિસ્થિતઃ ॥ ૪॥

કરૌ ચતુર્દશકરો ભૂધરોઽવ્યાન્મમાઙ્ગુલીઃ ।
સપ્તર્ષિધ્યાતો હૃદયમુદરં કુક્ષિસાગરઃ ॥ ૫॥

સપ્તદ્વીપપતિશ્ચિત્તં સપ્તવ્યાહૃતિરૂપવાન્ ।
કટિં મે સપ્તસંસ્થાર્થદાયકઃ સક્થિની મમ ॥ ૬॥

સપ્તગ્રહસ્વરૂપી મે જાનુની જઙ્ઘયોસ્તથા ।
સપ્તધાન્યપ્રિયઃ પાદૌ સપ્તપાતાલધારકઃ ॥ ૭॥

પશૂન્ધનં ચ ધાન્યં ચ લક્ષ્મીં લક્ષ્મીપ્રદોઽવતુ ।
દારાન્ પુત્રાંશ્ચ કન્યાશ્ચ કુટુમ્બં વિશ્વપાલકઃ ॥ ૮॥

અનુક્તસ્થાનમપિ મે પાયાદ્વાયુસુતઃ સદા ।
ચૌરેભ્યો વ્યાલદંષ્ટ્રિભ્યઃ શૃઙ્ગિભ્યો ભૂતરાક્ષસાત્ ॥ ૯॥

દૈત્યેભ્યોઽપ્યથ યક્ષેભ્યો બ્રહ્મરાક્ષસજાદ્ભયાત્ ।
દંષ્ટ્રાકરાલવદનો હનુમાન્ માં સદાઽવતુ ॥ ૧૦॥

પરશસ્ત્રમન્ત્રતન્ત્રયન્ત્રાગ્નિજલવિદ્યુતઃ ।
રુદ્રાંશઃ શત્રુસઙ્ગ્રામાત્સર્વાવસ્થાસુ સર્વભૃત્ ॥ ૧૧॥

ૐ નમો ભગવતે સપ્તવદનાય આદ્યકપિમુખાય વીરહનુમતે
સર્વશત્રુસંહારણાય ઠંઠંઠંઠંઠંઠંઠં ૐ નમઃ સ્વાહા ॥ ૧૨॥

ૐ નમો ભગવતે સપ્તવદનાય દ્વીતીયનારસિંહાસ્યાય અત્યુગ્રતેજોવપુષે
ભીષણાય ભયનાશનાય હંહંહંહંહંહંહં ૐ નમઃ સ્વાહા ॥ ૧૩॥

ૐ નમો ભગવતે સપ્તવદનાય તૃતીયગરુડવક્ત્રાય વજ્રદંષ્ટ્રાય
મહાબલાય સર્વરોગવિનાશાય મંમંમંમંમંમંમં ૐ નમઃ સ્વાહા ॥ ૧૪॥

ॐ નમો ભગવતે સપ્તવદનાય ચતુર્થક્રોડતુણ્ડાય સૌમિત્રિરક્ષકાય
પુત્રાદ્યભિવૃદ્ધિકરાય લંલંલંલંલંલંલં ॐ નમઃ સ્વાહા ॥ ૧૫॥

ॐ નમો ભગવતે સપ્તવદનાય પઞ્ચમાશ્વવદનાય રુદ્રમૂર્તયે સર્વ-
વશીકરણાય સર્વનિગમસ્વરૂપાય રુંરુંરુંરુંરુંરુંરું ॐ નમઃ સ્વાહા ॥ ૧૬॥

ॐ નમો ભગવતે સપ્તવદનાય ષષ્ઠગોમુખાય સૂર્યસ્વરૂપાય
સર્વરોગહરાય મુક્તિદાત્રે ॐॐॐॐॐॐॐ ॐ નમઃ સ્વાહા ॥ ૧૭॥

ॐ નમો ભગવતે સપ્તવદનાય સપ્તમમાનુષમુખાય
રુદ્રાવતારાય અઞ્જનાસુતાય સકલદિગ્યશોવિસ્તારકાય વજ્રદેહાય
સુગ્રીવસાહ્યકરાય ઉદધિલઙ્ઘનાય સીતાશુદ્ધિકરાય લઙ્કાદહનાય
અનેકરાક્ષસાન્તકાય રામાનન્દદાયકાય અનેકપર્વતોત્પાટકાય
સેતુબન્ધકાય કપિસૈન્યનાયકાય રાવણાન્તકાય બ્રહ્મચર્યાશ્રમિણે
કૌપીનબ્રહ્મસૂત્રધારકાય રામહૃદયાય સર્વદુષ્ટગ્રહનિવારણાય
શાકિનીડાકિનીવેતાલબ્રહ્મરાક્ષસભૈરવગ્રહ-
યક્ષગ્રહપિશાચગ્રહબ્રહ્મગ્રહક્ષત્રિયગ્રહવૈશ્યગ્રહ-
શૂદ્રગ્રહાન્ત્યજગ્રહમ્લેચ્છગ્રહસર્પગ્રહોચ્ચાટકાય
મમ સર્વ કાર્યસાધકાય સર્વશત્રુસંહારકાય
સિંહવ્યાઘ્રાદિદુષ્ટસત્વાકર્ષકાયૈ કાહિકાદિવિવિધજ્વરચ્છેદકાય
પરયન્ત્રમન્ત્રતન્ત્રનાશકાય સર્વવ્યાધિનિકૃન્તકાય
સર્પાદિસર્વસ્થાવરજઙ્ગમવિષસ્તમ્ભનકરાય
સર્વરાજભયચોરભયાઽગ્નિભયપ્રશમનાયાઽઽધ્યાત્મિકાઽઽધિ-
દૈવિકાધિભૌતિકતાપત્રયનિવારણાયસર્વવિદ્યાસર્વસમ્પત્સર્વપુરુષાર્થ-
દાયકાયાઽસાધ્યકાર્યસાધકાય સર્વવરપ્રદાયસર્વાઽભીષ્ટકરાય
ॐ હ્રાં હ્રીં હ્રૂં હ્રૈં હ્રૌં હ્રઃ ॐ નમઃ સ્વાહા ॥ ૧૮॥

ય ઇદં કવચં નિત્યં સપ્તાસ્યસ્ય હનુમતઃ ।
ત્રિસન્ધ્યં જપતે નિત્યં સર્વશત્રુવિનાશનમ્ ॥ ૧૯॥

પુત્રપૌત્રપ્રદં સર્વં સમ્પદ્રાજ્યપ્રદં પરમ્ ।
સર્વરોગહરં ચાઽઽયુઃકીર્તિદં પુણ્યવર્ધનમ્ ॥ ૨૦॥

રાજાનં સ વશં નીત્વા ત્રૈલોક્યવિજયી ભવેત્ ।
ઇદં હિ પરમં ગોપ્યં દેયં ભક્તિયુતાય ચ ॥ ૨૧॥

ન દેયં ભક્તિહીનાય દત્વા સ નિરયં વ્રજેત્ ॥ ૨૨॥

નામાનિસર્વાણ્યપવર્ગદાનિ રૂપાણિ વિશ્વાનિ ચ યસ્ય સન્તિ ।
કર્માણિ દેવૈરપિ દુર્ઘટાનિ તં મારુતિં સપ્તમુખં પ્રપદ્યે ॥ ૨૩॥

॥ ઇતિ શ્રીઅથર્વણરહસ્યેસપ્તમુખીહનુમત્કવચં સમ્પૂર્ણમ્ ॥

Encoded and Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

---

*Saptamukhi Hanumat Kavacham*

pdf was typeset on March 31, 2024

Please send corrections to *sanskrit@cheerful.com*